पैङ्गलोपनिषत्

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते

अथ ह पैङ्गलो याज्ञवल्क्यमुपसमेत्य द्वादशवर्षशुश्रूषापूर्वकं परमरहस्यकैवल्यमनुब्रूहीति पप्रच्छ । स होवाच याज्ञवल्क्यः सदेव सोम्येदमग्र आसीत् । तन्नित्यमुक्तमविक्रियं सत्यज्ञानानन्दं परिपूर्णं सनातनमेकमेवाद्वितीयंब्रह्म । तस्मिन्मरुशुक्तिकास्थाणुस्फटिकादौ जलरौप्यपुरुषरेखादिवल्लोहितशुक्लकृष्णगुणमयी गुणसाम्यानिर्वाच्या मूलप्रकृतिरासीत् । तत्प्रतिबिम्बितंयत्तत्साक्षिचैतन्यमासीत् । सा पुनर्विकृतिं प्राप्य सत्त्वोद्रिक्ताऽव्यक्ताख्यावरणशक्तिरासीत् । तत्प्रतिबिम्बितं यत्तदीश्वरचैतन्यमासीत् । स स्वाधीनमायःसर्वज्ञः सृष्टिस्थितिलयानामादिकर्ता जगदङ्कुररूपो भवति स्वस्मिन्विलीनंसकलं जगदाविर्भावयति । प्राणिकर्मवशादेष पटो यद्वत्प्रसारितः प्राणिकर्मक्षयात्पुनस्तिरोभावयति । तस्मिन्नेवाखिलं विश्वं संकोचितपटवद्वर्तते । ईशाधिष्ठितावरणशक्तितो रजोद्रिक्ता महदाख्या विक्षेपशक्तिरासीत् । तत्प्रतिबिम्बितं यत्तद्धिरण्यगर्भचैतन्यमासीत् । स महत्तत्त्वाभिमानी स्पष्टास्पष्टवपुर्भवति । हिरण्यगर्भाधिष्ठितविक्षेपशक्तितस्तमोद्रिक्ताहंकाराभिधा स्थूलशक्तिरासीत् । तत्प्रतिबिम्बितं यत्तद्विराट्चैतन्यमासीत् । स तदभिमानी स्पष्टवपुः सर्वस्थूलपालको विष्णुः प्रधानपुरुषो भवति । तस्मादात्मन आकाशःसंभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । तानि पञ्च तन्मात्राणि त्रिगुणानि भवन्ति । स्रष्टुकामो जगद्योनिस्तमोगुणमधिष्ठायसूक्ष्मतन्मात्राणि भूतानि स्थूलीकर्तुं सोऽकामयत । सृष्टेः परिमितानिभूतान्येकमेकं द्विधा विधाय पुनश्चतुर्धा कृत्वा स्वस्वेतरद्वितीयांशैः पञ्चधासंयोज्य पञ्चीकृतभूतैरनन्तकोटिब्रह्माण्डानि तत्तदण्डोचितचतुर्दशभुवनानितत्तद्भुवनोचितगोलकस्थूलशरीराण्यसृजत् । स पञ्चभूतानां रजोंशांश्चतुर्धाकृत्वा भागत्रयात्पञ्चावृत्त्यात्मकं प्राणमसृजत् । स तेषां तुर्यभागेन कर्मेन्द्रियाण्यसृजत् । स तेषां सत्त्वांशं चतुर्धा कृत्वा भागत्रयसमष्टितः पञ्चक्रियावृत्त्यात्मकमन्तःकरणमसृजत् । स तेषां सत्त्वतुरीयभागेन ज्ञानेन्द्रियाण्यसृजत् । सत्त्वसमष्टित इन्द्रियपालकानसृजत् । तानि सृष्टान्यण्डे प्राचिक्षिपत् ।

तदाज्ञया समष्ट्यण्डं व्याप्य तान्यतिष्ठन् । तदाज्ञयाऽहंकारसमन्वितोविराट् स्थूलान्यरक्षत् । हिरण्यगर्भस्तदाज्ञया सूक्ष्माण्यपालयत् । अण्डस्थानि तानि तेन विना स्पन्दितुं चेष्टितुं वा न शेकुः । तानि चेतनीकर्तुंसोऽकामयत ब्रह्माण्डब्रह्मरन्ध्राणि समस्तव्यष्टिमस्तकान्विदार्य तदेवानुप्राविशत् । तदा जडान्यपि तानि चेतनवत्स्वकर्माणि चक्रिरे । सर्वज्ञेशोमायालेशसमन्वितो व्यष्टिदेहं प्रविश्य तया मोहितो जीवत्वमगमत् । शरीरत्रयतादात्म्यात्कर्तृत्व-भोक्तृत्वतामगमत् । जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणधर्मयुक्तोघटीयन्त्रवदुद्विग्नो जातो मृत इव कुलालचक्रन्यायेन परिभ्रमतीति १

इति पैङ्गलोपनिषत्सु प्रथमोऽध्यायः

अथ पैङ्गलो याज्ञवल्क्यमुवाच सर्वलोकानां सृष्टिस्थित्यन्तकृद्विभुरीशःकथं जीवत्वमगमदिति । स होवाच याज्ञवल्क्यः स्थूलसूक्ष्मकारणदेहोद्भवपूर्वकं जीवेश्वरस्वरूपं विविच्य कथयामीति सावधानेनैकाग्रतया श्रूयताम् । ईशः पञ्चीकृतमहाभूतलेशानादाय व्यष्टिसमष्ट्यात्मकस्थूलशरीराणि यथाक्रमम-करोत् । कपालचर्मान्त्रास्थिमांसनखानि पृथिव्यंशाः । रक्तमूत्रलालास्वेदा-दिकमबंशाः । क्षुत्तृष्णोष्णमोहमैथुनाद्या अग्न्यंशाः । प्रचारणोत्तारणाश्वासा-दिकावाय्वंशाः । कामक्रोधादयो व्योमांशाः । एतत्संघातं कर्मणि संचि-तंत्वगादियुक्तं बाल्याद्यवस्थाभिमानास्पदं बहुदोषाश्रयं स्थूलशरीरं भवति । अथापञ्चीकृतमहाभूतरजोंशभागत्रयसमष्टितः प्राणमसृजत् । प्राणापानव्या-नोदानसमानाः प्राणवृत्तयः । नागकूर्मकृकरदेवदत्तधनंजया उपप्राणाः । हृदासननाभिकण्ठसर्वाङ्गानि स्थानानि । आकाशादिरजोगुणतुरीयभागेन कर्मेन्द्रियमसृजत् । वाक्पाणिपादपायूपस्थास्तद्वृत्तयः । वचनादानगम-नविसर्गानन्दास्तद्विषयाः । एवं भूतसत्त्वांशभागत्रयसमष्टितोऽन्तःकरणम-सृजत् । अन्तःकरणमनोबुद्धिचित्ताहंकारास्तद्वृत्तयः । संकल्पनिश्चयस्मर-णाभिमानानुसंधानास्तद्विषयाः । गलवदननाभिहृदयभ्रूमध्यं स्थानम् । भूत-सत्त्वतुरीयभागेन ज्ञानेन्द्रियमसृजत् । श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणास्तद्वृत्तयः । शब्दस्पर्शरूपरसगन्धास्तद्विषयाः

दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमृत्युकाः
चन्द्रो विष्णुश्चतुर्वक्त्रःशंभुश्च करणाधिपाः

अथान्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाःपञ्च कोशाः । अन्नरसेनैव भूत्वान्नरसेनाभिवृद्धिं प्राप्यान्नरसमयपृथिव्यांयद्विलीयते सोऽन्नमयकोशः । तदेव स्थूलशरीरम् । कर्मेन्द्रियैः सह प्राणादिपञ्चकं प्राणमयकोशः । ज्ञानेन्द्रियैः सह मनो मनोमयकोशः । ज्ञानेन्द्रियैःसह बुद्धिर्विज्ञानमयकोशः । एतत्कोशत्रयं लिङ्गशरीरम् । स्वरूपाज्ञानमानन्दमयकोशः । तत्कारणशरीरम् । अथ ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं प्राणादिपञ्चकं वियदादिपञ्चकमन्तःकरणचतुष्टयं कामकर्मतमांस्यष्टपुरम् । ईशाज्ञयाविराजो व्यष्टिदेहं प्रविश्य बुद्धिमधिष्ठाय विश्वत्वमगमत् । विज्ञानात्मा चिदाभासो विश्वो व्यावहारिको जाग्रत्स्थूलदेहाभिमानी कर्मभूरिति च विश्वस्यनाम भवति । ईशाज्ञया सूत्रात्मा व्यष्टिसूक्ष्मशरीरं प्रविश्य मन अधिष्ठायतैजसत्वमगमत् । तैजसः प्रातिभासिकः स्वप्नकल्पित इति तैजसस्य नामभवति । ईशाज्ञया मायोपाधिरव्यक्तसमन्वितो व्यष्टिकारणशरीरं प्रविश्यप्राज्ञत्वमगमत् । प्राज्ञोऽविच्छिन्नः पारमार्थिकः सुषुप्त्यभिमानीति प्राज्ञस्यनाम भवति । अव्यक्तलेशाज्ञानाच्छादितपारमार्थिकजीवस्य तत्त्वमस्यादिवाक्यानि ब्रह्मणैकतां जगुर्नेतरयोर्व्यावहारिकप्रातिभासिकयोः । अन्तःकरणप्रतिबिम्बितचैतन्यं यत्तदेवावस्थात्रयभाग्भवति । स जाग्रत्स्वप्नसुषुप्त्यवस्थाः प्राप्यघटीयन्त्रवदुद्विग्नो जातो मृत इव स्थितो भवति । अथ जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणाद्यवस्थाः पञ्च भवन्ति । तत्तद्देवताग्रहान्वितैः श्रोत्रादिज्ञानेन्द्रियैः शब्दाद्यर्थविषयग्रहणज्ञानं ज्ञाग्रदवस्था भवति । तत्र भ्रूमध्यं गतोजीव आपादमस्तकं व्याप्य कृषिश्रवणाद्यखिलक्रियाकर्ता भवति । तत्तत्फलभुक्च भवति । लोकान्तरगतः कर्मार्जितफलं स एव भुङ्क्ते । स सार्वभौमवद्व्यवहाराच्छ्रान्तोऽन्तर्भवनं प्रवेष्टुं मार्गमाश्रित्य तिष्ठति । करणोपरमे जाग्रत्संस्कारोत्थप्रबोधवद्ग्राह्यग्राहकरूपस्फुरणं स्वप्नावस्था भवति । तत्र विश्व एव जाग्रद्व्यवहारलोपान्नाडीमध्यं चरंस्तैजसत्वमवाप्य वासनारूपकं जगद्वैचित्र्यंस्वभासा भासयन्यथेप्सितं स्वयं भुंङ्क्ते । चित्तैककरणा सुषुप्त्यवस्था भवति । भ्रमविश्रान्तशकुनिः पक्षौ संहृत्य नीषाभिमुखं यथा गच्छति तथा जीवोऽपिजाग्रत्स्वप्नप्रपञ्चे व्यवहृत्य श्रान्तोऽज्ञानं प्रविश्य स्वानन्दं भुङ्क्ते । अकस्मान्मुद्गरदण्डाद्यैस्ताडितवद्भयाज्ञानाभ्यामिन्द्रियसंघातैः कम्पन्निव मृततुल्यामूर्च्छा भवति । जाग्रत्स्वप्नसुषुप्तिमूर्च्छावस्थानामन्याऽऽब्रह्मादिस्तम्बपर्यन्तंसर्वजीवभयप्रदा स्थूलदेहविसर्जनी मरणावस्था भवति । कर्मेन्द्रि-

याणिज्ञानेन्द्रियाणि तत्तद्विषयान्प्राणान्संहृत्य कामकर्मान्वित अविद्याभूत-वेष्टितोजीवो देहान्तरं प्राप्य लोकान्तरं गच्छति । प्राक्कर्मफलपाकेना-वर्तान्तरकीठवद्विश्रान्तिं नैव गच्छति । सत्कर्मपरिपाकतो बहूनां जन्मनामन्ते नृणांमोक्षेच्छा जायते । तदा सद्गुरुमाश्रित्य चिरकालसेवया बन्धं मोक्षं-कश्चित्प्रयाति । अविचारकृतो बन्धो विचारान्मोक्षो भवति । तस्मात्सदा-विचारयेत् । अध्यारोपापवादतः स्वरूपं निश्चयीकर्तुं शक्यते । तस्मा-त्सदाविचारयेज्जगज्जीवपरमात्मनो जीवभावजगद्भावबाधे प्रत्यगभिन्नं ब्रह्मैवावशिष्यत इति १

इति पैङ्गलोपनिषत्सु द्वितीयोऽध्यायः

अथ हैनं पैङ्गलः पप्रच्छ याज्ञवल्क्यं महावाक्यविवरणमनुब्रूहीति ।स होवाच याज्ञवल्क्यस्तत्त्वमसि त्वं तदसि त्वं ब्रह्मास्यहं ब्रह्मास्मीत्यनुसंधानंकुर्यात् । तत्र पारोक्ष्यशबलः सर्वज्ञत्वादिलक्षणो मायोपाधिः सच्चिदानन्दलक्षणो जगद्योनिस्तत्पदवाच्यो भवति । स एवान्तःकरणसंभिन्नबोधोऽस्मत्प्रत्यया-वलम्बनस्त्वंपदवाच्यो भवति । परजीवोपाधिमायाविद्ये विहाय तत्त्वं-पदलक्ष्यं प्रत्यगभिन्नं ब्रह्म । तत्त्वमसीत्यहं ब्रह्मास्मीति वाक्यार्थविचारः श्रवणंभवति । एकान्तेन श्रवणार्थानुसंधानं मननं भवति । श्रवणमनन-निर्विचिकित्स्येऽर्थे वस्तुन्येकतानवत्तया चेतःस्थापनं निदिध्यासनं भवति । ध्यातृध्यानेविहाय निवातस्थितदीपवद्ध्येयैकगोचरं चित्तं समाधिर्भवति । तदानीमात्मगोचरा वृत्तयः समुत्थिता अज्ञाता भवन्ति । ताः स्मरणादनुमीयन्ते । इहानादिसंसारे संचिताः कर्मकोटयोऽनेनैव विलयं यान्ति । ततोऽभ्या-सपाटवात्सहस्रशः सदाऽमृतधारा वर्षन्ति । ततो योगवित्तमाः समाधिं धर्ममेघंप्राहुः । वासनागाले निःशेषममुना प्रविलापिते कर्मसंचये पुण्यपापे समूलोन्मूलिते प्राक्परोक्षमपि करतलामलकवद्वाक्यमप्रतिबद्धापरोक्षसाक्षा-त्कारंप्रसूयते । तदा जीवन्मुक्तो भवति । ईशः पञ्चीकृतभूतानामपञ्चीकरणं कर्तुंसोऽकामयत । ब्रह्माण्डतद्गतलोकान्कार्यरूपांश्च कारणत्वं प्रापयित्वा ततःसूक्ष्माङ्गं कर्मेन्द्रियाणि प्राणांश्च ज्ञानेन्द्रियाण्यन्तःकरणचतुष्टयं चैकीकृत्य-सर्वाणि भौतिकानि कारणे भूतपञ्चके संयोज्य भूमिं जले जलं वह्नौ वह्निंवायौ वायुमाकाशे चाकाशमहंकारे चाहंकारं महति महदव्यक्तेऽव्यक्तं पुरुषेक्रमेण विलीयते । विराड्हिरण्यगर्भेश्वरा उपाधिविलयात्परमात्मनि लीयन्ते । पञ्ची-

कृतमहाभूतसंभवकर्मसंचितस्थूलदेहः कर्मक्षयात्सत्कर्मपरिपाकतोऽप-ञ्ची-करणं प्राप्य सूक्ष्मेणैकीभूत्वा कारणरूपत्वमासाद्य तत्कारणं कूटस्थेप्र-त्यगात्मनि विलीयते । विश्वतैजसप्राज्ञाः स्वस्वोपाधिलयात्प्रत्यगात्मनि-लीयन्ते । अण्डं ज्ञानाग्निना दग्धं कारणैः सह परमात्मनि लीनं भवति । ततो ब्राह्मणः समाहितो भूत्वा तत्त्वंपदैक्यमेव सदा कुर्यात् । ततोमेघापा-येंऽशुमानिवात्माऽविर्भवति

ध्यात्वा मध्यस्थमात्मानं कलशान्तरदीपवत्
अङ्गुष्ठमात्रमात्मानमधूमज्योतिरूपकम् १

प्रकाशयन्तमन्तःस्थंध्यायेत्कूटस्थमव्ययम्
ध्यायन्नास्ते मुनिश्चैव चासुप्तेरामृतेस्तु यः २

जीवन्मुक्तः स विज्ञेयः स धन्यः कृतकृत्यवान्
जीवन्मुक्तपदं त्यक्त्वास्वदेहे कालसात्कृते
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ३

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्
अनाद्यनन्तंमहतः परं ध्रुवं तदेव शिष्यत्यमलं निरामयम् ४ इति

इति पैङ्गलोपनिषत्सु तृतीयोऽध्यायः ३

अथ हैनं पैङ्गलः पप्रच्छ याज्ञवल्क्यं ज्ञानिनः किं कर्म का च स्थितिरिति । स होवाच याज्ञवल्क्यः । अमानित्वादिसंपन्नो मुमुक्षुरेकविंशतिकुलंतारयति । ब्रह्मविन्मात्रेण कुलमेकोत्तरशतं तारयति

आत्मानं रथिनं विद्धिशरीरं रथमेव च
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च १

इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्
जङ्गमानि विमानानि हृदयानि मनीषिणः २

आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्महर्षयः
ततो नारायणः साक्षाद्धृदये सुप्रतिष्ठितः ३

प्रारब्धकर्मपर्यन्तमहिनिर्मोकवद्व्यवहरति
चन्द्रवच्चरते देही स मुक्तश्चानिकेतनः ४

तीर्थे श्वपचगृहे वा तनुंविहाय याति कैवल्यम् । प्राणानवकीर्य याति कै-
वल्यम्

तं पश्चाद्दिग्बलिं कुर्यादथवा स्वननं चरेत्
पुंसः प्रव्रजनं प्रोक्तं नेतराय कदाचन ५

नाशौचं नाग्निकार्यं च न पिण्डं नोदकक्रिया
न कुर्यात्पार्वणादीनि ब्रह्मभूताय भिक्षवे ६

दग्धस्य दहनं नास्ति पक्वस्य पचनं यथा
ज्ञानाग्निदग्धदेहस्य न च श्राद्धं न च क्रिया ७

यावच्चोपाधिपर्यन्तं तावच्छुश्रूषयेद्गुरुम्
गुरुवद्गुरुभार्यायां तत्पुत्रेषु च वर्तनम् ८

शुद्धमानसःशुद्धचिद्रूपः सहिष्णुः सोऽहमस्मि सहिष्णुः सोऽहमस्मीति प्राप्ते ज्ञानेनविज्ञाने ज्ञेये परमात्मनि हृदि संस्थिते देहे लब्धशान्तिपदं गते तदा प्रभामनोबुद्धिशून्यं भवति । अमृतेन तृप्तस्य पयसा किं प्रयोजनम् । एवं स्वात्मानंज्ञात्वा वेदैः प्रयोजनं किं भवति । ज्ञानामृततृप्तयोगिनो न किंचित्कर्तव्यमस्ति तदस्ति चेन्न स तत्त्वविद्भवति । दूरस्थोऽपि न दूरस्थः पिण्डवर्जितःपिण्डस्थोऽपि प्रत्यगात्मा सर्वव्यापी भवति

हृदयं निर्मलं कृत्वा चिन्तयित्वाप्यनामयम्
अहमेव परं सर्वमिति पश्येत्परं सुखम् ९

यथा जलेजलं क्षिप्तं क्षीरे क्षीरं घृते घृतम्
अविशेषो भवेत्तद्वज्जीवात्मपरमात्मनोः १०

देहे ज्ञानेन दीपिते बुद्धिरखण्डाकाररूपा यदा भवति तदाविद्वान्ब्रह्मज्ञाना-
ग्निना कर्मबन्धं निर्दहेत्

ततः पवित्रं परमेश्वराख्यमद्वैतरूपंविमलाम्बराभम्
यथोदके तोयमनुप्रविष्टं तथात्मरूपो निरुपाधिसंस्थितः ११

आकाशवत्सूक्ष्मशरीर आत्मा न दृश्यते वायुवदन्तरात्मा
सबाह्यमभ्यन्तरनिश्चलात्मा ज्ञानोल्कया पश्यति चान्तरात्मा १२

यत्र यत्रमृतो ज्ञानी येन वा केन मृत्युना
यथा सर्वगतं व्योम तत्र तत्र लयं गतः १३

घटाकाशमिवात्मानं विलयं वेत्ति तत्त्वतः
स गच्छति निरालम्बंज्ञानालोकं समन्ततः १४

तपेद्वर्षसहस्राणि एकपादस्थितो नरः
एतस्यध्यानयोगस्य कलां नार्हति षोडशीम् १५

इदं ज्ञानमिदं ज्ञेयं तत्सर्वं ज्ञातुमिच्छति
अपि वर्षसहस्रायुः शास्त्रान्तं नाधिगच्छति १६

विज्ञेयोऽक्षरतन्मात्रो जीवितं वापि चञ्चलम्
विहाय शास्त्रजालानि यत्सत्यं तदुपास्यताम् १७

अनन्तकर्मशौचं च जपो यज्ञस्तथैव च
तीर्थयात्राभिगमनं यावत्तत्त्वं न विन्दति १८

अहंब्रह्मेति नियतं मोक्षहेतुर्महात्मनाम्

द्वे पदे बन्धमोक्षाय न ममेति ममेति च १९

ममेति बध्यते जन्तुर्निर्ममेति विमुच्यते
मनसो ह्युन्मनीभावे द्वैतं नैवोपलभ्यते २०

यदायात्युन्मनीभावस्तदा तत्परमं पदम्
यत्र यत्र मनो याति तत्र तत्र परं पदम् २१

तत्र तत्र परं ब्रह्म सर्वत्र समवस्थितम्
हन्यान्मुष्टिभिराकाशंक्षुधार्तः खण्डयेत्तुषम् २२

नाहंब्रह्मेति जानाति तस्य मुक्तिर्न जायते
य एतदुपनिषदं नित्यमधीते सोऽग्निपूतो भवति

स वायुपूतो भवति । स आदित्यपूतो भवति । स ब्रह्मपूतो भवति । स विष्णुपूतो भवति । स रुद्रपूतो भवति । स सर्वेषु तीर्थेषु स्नातो भवति । स सर्वेषु वेदेष्वधीतोभवति । स सर्ववेदव्रतचर्यासु चरितो भवति । तेने-तिहासपुराणानां रुद्राणांशतसहस्राणि जप्तानि फलानि भवन्ति । प्रणवा-नामयुतं जप्तं भवति । दशपूर्वान्दशोत्तरान्पुनाति । स पङ्क्तिपावनो भवति । स महान्भवति । ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुतल्पगमनतत्संयोगिपा-तकेभ्यः पूतो भवति । तद्विष्णोःपरमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् २३

ॐ सत्यमित्युपनिषत्

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते

इति पैङ्गलोपनिषत्समाप्ता